तञ्चम् २, } तञ्चम् २, } तितञ्चिषम् २-तितङ्क्षम् २,
तञ्चित्वा-तक्त्वा २, } तञ्चयित्वा २, } तितञ्चिषित्वा २-तितङ्क्षित्वा २,
तातचम् २ ;
तातचित्वा २.

(703) "तप सन्तापे" (I-भ्वादिः-985. सक. सेट्. पर.)

'सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत्।
ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति च ॥' (श्लो. 131) इति देवः।

तापकः-पिका, तापकः-पिका, [1]तितप्सकः-प्सिका, तातपकः-पिका ;
तप्ता[2]निष्टप्ता-निस्तप्ता-त्री, तापयिता-त्री, तितप्सिता-त्री ; तातपिता-त्री;
[3]उत्तपन्-निष्टपन्-[वा सुवर्णं] न्ती, तापयन्-न्ती, तितप्सन्-न्ती ; —
तप्स्यन्-न्ती-ती, तापयिष्यन्-न्ती-ती, तितप्सिष्यन्-न्ती-ती ; —
[4]उत्तपमानः[A]-वितपमानः, [5]उत्तपमानः [पृष्ठम्], तापयमानः — तातप्यमानः ;
उत्तप्स्यमानः-वितप्स्यमानः-तापयिष्यमाणः, — तातपिष्यमाणः ;
संतप्-सन्तपौ-संतपः ; — — —
तप्तः-[B]सन्तप्तः, तप्तम्, तापितः, तितप्सितः, तातपितः-तवान् ;
[6]तपनः, [7]ललाटन्तपः[C] [आदित्यः],

---

1. 'हलन्ताच्च' (1-2-10) इति सनः कित्वात् न गुणः। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
2. 'निसस्तपतावनासेवने' (8-3-102) इति षत्वम्। आसेवनम्=पुनः पुनः करणम्। "'निष्टप्तं रक्षो निष्टप्ता अरातयः।' इत्यत्र सदप्यासेवनं न विवक्ष्यते। छान्दसो वा वर्णविकारः।" इति काशिका (8-3-102)। आसेवने तु निस्तप्ता इत्येव।
3. 'उद्विभ्यां तपः' (1-3-27) इत्यत्र 'अकर्मकाच्च' (1-3-26) इत्यनुवृत्तेः सकर्मकात् परस्मैपदमेव।
4. 'उद्विभ्यां तपः' (1-3-27) इति शानच्।
5. 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा. 1-3-27) इत्युक्तेरत्रापि शानच्।
6. 'सहितपिदमेः संज्ञायाम्' (ग. सू. 3-1-134) इति नन्द्यादिषु पाठात् कर्तरि ल्युः। तपनः=सूर्यः।
7. 'असूर्यललाटयोर्दृशितपोः' (3-2-36) इति खश्। 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुम्। ललाटं तपतीति ललाटन्तपः=सूर्यः।

A. 'तीव्रमुत्तपमानोऽयमशक्यः सोढुमातपः।' भ. का. 8-15.
B. 'सन्तप्तचामीकरवल्गुवज्रं विभागविन्यस्तमहार्घरत्नम्॥' भ. का. 3. 3.
C. 'शमयेदपि सङ्ग्रामे यो ललाटन्तपं रविम्॥' भ. का. 6-100.